X

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 26

Title 'SUDRANAM VASTU'SANTIH.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 26 Subject: Ritual

Title: Śudrānamvāstu Śāntiḥ

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.:

Size: 11" x 5" Extent: 4 folls.

Language: Sanskrit. Script: Devanāgarī.

Remarks: Seems complete.

॥श्रीगणेशाय नमः॥ अथ शूद्राणां वास्तुशांतिर्लिख्यते॥ सुमुखश्चेत्यादि शास्त्रोक्तपुण्यं मम सकुटुंबस्य स
०स्य नूतनगृहप्रवेशांगभूतवास्तुपुरुषप्रीतिद्वारा सुखायुर्लक्ष्मीपुत्रपौत्राद्यनेकसुखप्राप्त्यर्थं सुखेन नि
वासार्थं स्वयं हवास्तुशांतिकर्माहं करिष्ये॥ तदंगभूतं गणपतिपूजनपूर्वकं ब्रह्माचार्यादिऋत्विजां वरणं पु
ण्याहवाचनं च करिष्ये॥ अथ गणपतिपूजनं॥ हे हेरंब त्वमेह्येहि ह्यंबिलं रुलाभपतिः पिता॥ सिद्धिबुद्धिपते त्र्यक्ष
लक्षलाभपतिः पिता॥ आवाहनं॥ आसनं प्रवरं देव सितानूतनमनुत्तमं॥ पद्मकंतान्वितं शुभ्रं तत्र त्वं समा
विश॥ श्रीमहागण० आसनं सं०॥ रुद्रादिवंदितं देवं सिद्धगंधर्वसेवितं॥ त्वत्पादवंदितं देवं विनायक नमोस्तुते॥
पाद्यं॥ हेमात्ररक्तपासिंधोवाणमातुरगजप्रभो॥ वरद त्वं वरं देहि वांछितं वांछितार्थद॥ अनेनार्घप्रदाने
न फलदो नवमे प्रभो॥ अर्घ्यं॥ आचमनं कुरु देवेश सुरवंद्यानुवादन॥ सर्वाघदलनश्यामनीलकंठ न
मोस्तुते॥ आचमनं॥ स्नानं च विघ्नराजेंद्र सर्वनद्यंबुकल्पितं॥ क्षीरश्च दधि सर्पिभ्यां मधुशर्करया समं॥
॥उमासुताय० स्नानं॥ आचमनं॥ रक्तांबरधरं देवं शंखचक्रगदाधरं॥ अध्यक्षं सर्वदेवानां वंदेहं गणनाय
कं॥ वस्त्रं॥ आचमनं॥ सूर्यकोटिप्रतीकाशं वक्रतुंडं चतुर्भुजं॥ हेममयज्ञोपवीतं च बालार्कसदृशप्रभुं॥ यज्ञोप
वीतं॥ आचमनं॥ चंदनं॥ पुष्पं॥ ६ गुलालं॥ नानापरिमलैर्द्रव्यैर्निर्मितं चूर्णमुत्तमं॥ अबीरनामकं पुण्यं
गंधि चारु प्रगृह्यतां॥ अबीरं॥ सिंदूरं॥ गुग्गुलं महिषाख्यं च दशांगं च सुधूपकं॥ सुगंधेन समायुक्तं उमासु
त नमोस्तुते॥ धूपं॥ आज्यं च वर्तिसंयुक्तं वह्निना योजितं पुरा॥ दीपं गृहाण देवेश त्रैलोक्यतिमिरापह॥ दी
पं स०॥ नैवेद्यं गृह्यतां देव नानामोदकसंयुतं॥ सर्वैः फलैः समायुक्तं नैवेद्यं प्रतिगृह्यतां॥ नैवेद्यं॥ आचमनं

पूगीफलं सकर्पूरं नागवल्लीदलैर्युतं॥ कंखदिरेण समायुक्तं तांबूलं प्रतिगृह्यतां॥ पुगीफलतांबूलं स०॥ आराति
कं स०॥ अनीप्सितार्थसिद्ध्यर्थं पू० नमः॥ नमस्कारं॥ महासंकष्टदग्धोहं गणेश शरणं गतः॥ तस्मान्मनोरथः पूर्णं
कुरु विघ्नेश्वर प्रिय॥ प्रदक्षिणां स०॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ
मे॥ दक्षिणां स०॥ अथ स्तुतिः॥ विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सकलाय जगद्धिताय॥ नागाननाय
श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमोस्तुते॥ त्वां विघ्नशत्रुदलनेति च सुंदरेति भक्तप्रियेति सुख श्रीपू०
देति फलप्रदेति॥ विद्याप्रदेत्यघहरेति च ये स्तुवंति॥ तेभ्यो गणेश वरदो भव नित्यमेव॥ इति गणपतिपूजनं॥
अथ वरणं॥ आपल्लीरं कुशाग्राणि दधिदूर्वाशमिस्तथा॥ अक्षताः सर्षपाद्यैते रष्टांगोऽर्घ उच्यते॥ सुमुहू
र्तादिकृतनिर्णयं शोभने मंडपे द्विजैः शांतिपाठे घदानं च पृच्छा पूर्वं समारभेत्॥ आयुरारोग्यपुत्रादिसुखश्री
प्राप्तये मम॥ आपद्विघ्नविनाशाय शत्रुबुद्धिक्षयाय च॥ विशेषकाम्यहोमेन सहितैः समिदादिभिः॥
आदित्याद्या ग्रहाः सर्वे राहुकेतुपुरःसराः॥ ग्रहदेवाधिदेवैश्च नक्षत्राणां च दैवतैः॥ इंद्रादिभि
श्च दिक्पालैर्ब्रह्माविष्णुमहेश्वरैः॥ वास्तुदुर्गागणेशैश्च क्षेत्रपालेन संयुतैः॥ नौमातरिहदेवै
श्च कुलदेवैश्च मातृभिः॥ चतुर्निश्चैव देवैश्च रुद्रगणसहितैस्तथा॥ एभ्यो मंत्रादिदेवेभ्यः पाद्या
र्घवोदयाम्यहं॥ स्वागतं भो द्विजश्रेष्ठा मदनुग्रहकारकाः॥ अयमर्घ इदं पाद्यं भवद्भिः प्रतिगृह्यतां॥
॥अर्घोर्घः प्रतिगृह्यतां॥ प्रतिगृह्णामि॥ अथ ब्रह्माचार्यऋत्विजां वरणं॥ गोत्रं प्रवरं शाखाध्यायि

नं वास्तुशांतिकर्मणि ब्रह्मत्वेन त्वामहं वृणे ॥ वृतोस्मि ॥ वृताय एनत्ते पाद्यं ॥ पाद्यवनेजनं ॥ पादप्रक्षाल
नं ॥ एष वोऽर्घः ॥ इदमत्र पूजा ॥ ब्रह्मणे चंदनं पुष्पं अक्षतं पुष्पमालां स० हस्तमुद्रा कर्णमुद्रा वास
सिया वत्कर्म समाप्यते तावत्वं ब्रह्मा भव ॥ प्रार्थना ॥ यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः ॥ तथा
त्वं मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥ भवामि ॥ ततः उत्तराभिमुखो यजमानः प्राङ्मुखं आचार्यं वृणुया
त् ॥ अमुकसगोत्रं अमुकप्र० यिनं अमुकशर्माणं आचार्यत्वेन त्वामहं वृणे ॥ वृतोस्मि ॥ आचार्याय एत
त्ते० र्घः इदमत्र पूजा चंदनं पुष्पं ॥ हस्तमुद्रि० वासांसि ॥ कंकणबंधनं ॥ प्रार्थना ॥ आचार्यस्त्वं य
था स्वर्गे शक्रादीनां बृहस्पतिः ॥ तथा त्वं मम यज्ञेऽस्मिन् आचार्यो भव सुव्रत ॥ भवामीति प्र० ॥ पश्चा २
त् यजमानः प्राङ्मुख उपविश्य ॥ ऋत्विजो वरणं कुर्यात् ॥ अ० गोत्रं प्रवरं० अस्मिन् वास्तुशांतिकर्म
णि ऋत्विक्त्वेन त्वाम० कंकणबंधनं ॥ ऋत्विजस्तु यथा स्वर्गे शक्रादीनां महर्षयः ॥ तथा त्वं मम य
ज्ञेऽस्मिन् ऋत्विक् भव द्विजोत्तम ॥ एवं सर्वत्र ॥ अथ वरणं आदौ ऐंद्री नारायणो रक्षेत् पुंडरीकाक्ष याम्य
के प्रद्युम्नः पश्चिमायां तु वासुदेवस्तथोत्तरे ॥ ईशान्यामवतादिक्षु राग्नेय्यां च जनार्दनः ॥ नैरृत्यां प
द्मनाभस्तु वायव्यां मधुसूदनः ॥ ऊर्ध्वं गोवर्धनो रक्षेदधस्ताच्च त्रिविक्रमः ॥ एताभ्यो दशदिग्भ्यस्तु
सर्वतः पातु केशवः ॥ उपकल्पितानां वरणद्रव्याणां पवित्रतास्तु ॥ अर्घेत्यादि० र्थ वरणद्रव्य
म०च्य ॥ ब्रह्माचार्यादि ऋत्विग्भ्यो नमः इदमत्र ॥ ब्रह्मा० जी आसनं संपन्नं २ ब्रह्माचा० जी भोजनं

उखबासर्ताभूलं

संपन्नं २ ब्रह्मा० जां दक्षिणां संप० ॥ सुप्रोक्षि० ॥ अस्य वरुणं आचकर्मणो यथमस्तु गृहे ३ ॥ स्वस्तिवाचनं ॥ संपूज्य
कलशस्थापनं ॥ विश्वाधारा सुधरिणी शेषनागफणेधृता ॥ धृता चादिवराहेण लक्ष्मेन शतबाहुना ॥ १ ॥ हिमेस
प्तादिसंभूतं ताम्रं सुश्रेष्ठं ईनवं ॥ कलशं धौतवर्णं छिद्रव्रणविवर्जितं ॥ २ ॥ जीवनं सर्वजीवानां पावनं पावनात्म
बीजं सर्वोषधीनां च तत्कलशे पूरयाम्यहं ॥ ३ ॥ ओषधीः सर्ववृक्षाणां तृणगुल्मलतापुरो ॥ पूजायाः प्रथमं गेहे गृहाण
त्वं प्रसीद मे ॥ पूगीफलमिदं श्रेष्ठं सर्वपापप्रणाशनं ॥ पुत्रसौख्यादिफलदं कलशे तत् क्षिपाम्यहं ॥ ५ ॥ हिरण्यगर्भग
र्भस्थं हेमबीजं विभावसोः ॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे ॥ ६ ॥ प्रसूनं पञ्चवैर्युक्तं मधुगंधं मनोहरं ॥ भ्र
मरैर्मधुमत्तैश्च सेवितं देवताप्रियं ॥ ७ ॥ सूत्रं कार्पाससंभूतं ब्रह्मणा निर्मितं पुरा ॥ येन बद्धं जगत्सर्वं वेष्टनं क
लशस्य तत् ॥ ८ ॥ पिधानं सर्वलोकानां सर्वकार्यार्थसाधनं ॥ पूर्णस्तु कलशोपेतं कलशोपरि तिष्ठतं ॥ ९ ॥ प्र
तिष्ठा सर्वदेवानां मित्रावरुणनिर्मिता ॥ प्रतिष्ठां तां करोम्यत्र कलशे देवतेः सह ॥ १० ॥ संपूज्य गंधमा० स्वस्ति ३ अथ
निषेकः ॥ सहस्राक्षं शतधारमृषिभिः पावनं कृतं ॥ तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते ॥ भगं ते वरुणो राजा
भगं सूर्यो बृहस्पतिः ॥ भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः ॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्धनि ॥ ललाटे क
र्णयोरक्ष्णोरापस्तद्घ्नंतु ते सदा ॥ अस्तुतानिषेको अस्तु ॥ अथ कंडिका ॥ यजमानहस्ते कंकणबंधनं ॥ अ
स्य यागस्य निष्पत्तौ भवंतोऽभ्यर्थिता मया ॥ सुप्रसादेन कर्तव्यं कर्मेति द्विधिपूर्वकं इति मंत्रेण आचार्य हस्ते पू
गीफलं दद्यात् ॥ ३ ॥ अथातो गृह्यस्थालीपाकानां कर्म ॥ दर्भैः परिसमुह्य ॥ १ ॥ गोमयेनोपलिप्य ॥ २ ॥ स्रुवेणोल्लिख्य ॥ ३ ॥
अनामिकांगुष्ठेनोद्धृत्य ॥ ४ ॥ उदकेनाभ्युक्ष्य ॥ ५ ॥ अग्निमुपसमाधाय ॥ ६ ॥ दक्षिणतो ब्रह्मासनं ॥ उत्तरतः प्रणीतासनं ॥ तत्र ब्र

दूर्वामार्जनं दधिचंदनं

ह्मोपवेशनं। यावत्कर्म समाप्यते तावत्त्वं ब्रह्मा भव। भवामि। पूर्वेण ब्रह्मणो गमनं। ब्रह्मानुज्ञात उत्तरे प्रणीताप्रणयनं। ब्र
ह्मन्नपः प्रणेष्यामि। प्रणय। ईशानादिपूर्वाग्रैर्दर्भैरेकमुष्ट्या परिस्तरणं। पुरस्तात् दक्षिणतः। पश्चादुत्तरतश्च। उदग
ग्रैः प्रागग्रैश्च यथायोगं दक्षिणतः॥ पश्चादुत्तरतश्च॥ अग्निमपरेणोत्तरेण वा पात्रासादनं। पवित्रच्छेदनानि त्रीणि। पवित्रे द्वे प्रोक्षणी
पात्रं। आज्यस्थाली। चरुस्थाली संमार्गकुशाः। उपयमनकुशाः। समिधस्तिस्रः। स्रुचः। स्रुवः। आज्यं। तंडुलाः। पूर्णपात्रं चेति त्रि
भिर्दर्भैश्छित्वा। त्रीणि त्यक्त्वा द्वे गृहीत्वा। तत्पवित्रहस्तेन प्रणीतोदकेन प्रोक्षण्याः त्रिः पूरणं। उत्पवनं। उद्दिंगनं। सव्यहस्तकरणं॥
नामिरत्नासामेव प्रोक्षणी॥ आज्यस्थालीप्रोक्षणं। चरुस्थालीप्रोक्षणं। सम्मार्गकुशप्रोक्षणं। उपयमनकुशप्रोक्षणं। समित्प्रोक्षणं
स्रुचः प्रोक्षणं स्रुवः प्रोक्षणं। आज्यप्रोक्षणं। तंडुलप्रोक्षणं। पूर्णपात्रप्रोक्षणं। असंचरे प्रोक्षणीं निधाय। आज्यस्थाल्यां आ ३
ज्यनिर्वापं कर्म ब्रह्मा करोति। चरुस्थाल्यां सोदकायां तंडुलप्रक्षेपः। वास्तोष्पते येनुष्टं गृह्णामि ३ चतुर्थं तूष्णीं॥ आदित्याय सो
मायांगारकाय बुधाय बृहस्पतये शुक्राय शनिश्चराय राहवे केतुभ्यो जुं० मि चतुर्थं तूष्णीं। त्रिः प्रक्षालनं। उभयोश्चरोरधि
श्रयणं गृहीतोल्मुकेनोभयोः पर्यग्निकरणं॥ अत्रावसरे वास्तुस्थापनं ग्रहस्थापने॥ नैर्ऋत्ये वास्तुस्थापनं। अत्राद्यं
अस्मिन् वास्तुशांतिकर्मणि शिखिन्यादिवास्तुपीठस्थदेवतानां स्थापनप्रतिष्ठाहं करिष्ये॥ शिखिने नमः शिखिनं आवाह
यामि स्थापयामि १। पर्जन्याय० पर्जन्यं आ०मि २ जयंताय० जयंतं आ०मि ३ कुलिशायुधाय० कुलिशायुधं आ०मि ४। सूर्या
य० सूर्यं आ०मि ५ सत्याय० सत्यं आ०मि ६ भृशाय० भृशं० आ०मि ७ आकाशाय० आकाशं आ०मि ८॥ वायवे० वायुं आ०
मि ९ पूष्णे० पूषाणं आ०मि १०॥ वितथाय० वितथं आ०मि ११ बृहत्क्षत्राय० बृहत्क्षत्रं आ०मि १२ यमाय० यमं आ०मि १३॥

श्रीफलार्धाः॥ पूजनं चार्चनं कृतं विधेः संस्कृ॥ ॥ ततो ग्रहस्थापनं कुंडस्य रुद्रदिग्भागे द्विहस्तं पीठमालिखेत्॥ पीठे चाष्टदली
कृत्वा स्थापनं तत्र कारयेत्॥ श्वेततंडुलकैस्तत्र ग्रहाणां स्थापनं स्मृतं॥ वृत्तमंडलमादित्ये चतुरस्रं निशाकरे॥ त्रिकोणं भू
मिपुत्रे तु बुधे वै बाणसन्निभं॥ गुरवे पट्टिकाकारं पंचकोणं च भार्गवे॥ धनुषाकृति मंदे च शूर्पाकारं तु राहवे॥ ध्वजा
कारं तु केतोर्वै मंडलानि समालिखेत्॥ मध्ये तु भास्करं विंद्यात् शशिनं पूर्वदक्षिणे॥ दक्षिणे लोहितं विंद्यात् बुधं पूर्वोत्तरे तथा॥ उत्त
रे च गुरुं विंद्यात् पूर्वेणैव तु भार्गवं॥ पश्चिमे तु शनिं विंद्यात् राहुं दक्षिणपश्चिमे॥ पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतंडुलैः॥ अथाधि
देवताप्रत्यधिदेवता॥ अग्निर्दक्षिणतः सूर्यादुमा तूत्तरतो रवेः॥ आपउत्तरतः सोमात् उमा दुत्तरतः शशेः॥ भूमिः पश्चिमतो भौमा ४
स्कंदो दक्षिणतः स्मृतः॥ विष्णुः प्राची बुधात्स्थाप्यो पश्चान्नारायणः स्मृतः॥ इंद्रः पश्चाद्गुरोश्चैव ब्रह्मा स्थाप्योथ पूर्वतः॥ इंद्राणी
पश्चिमे शुक्रात् प्राच्यामिंद्रस्तथैव च
अग्न्युत्तारणमंत्रः॥ अग्निर्वैश्वानरो वह्निर्वशिनिहोत्रो धनंजयः॥ अग्न्युत्तारणार्थाय मूर्तीनां शुद्धिहेतवे॥

गंधर्वाय॰गंधर्वं आ॰मि॰ ॥ २४ ॥ भृंगराजाय॰भृंगराजं आ॰मि॰ ॥ २५ ॥ मृगाय॰मृगं आ॰मि॰ ॥ २६ ॥ पितृगणाय॰पितृगणं आ॰मि॰ ॥ २७ ॥ दौ
वारिकाय॰दौवारिकं आ॰मि॰ ॥ २८ ॥ सुग्रीवाय॰सुग्रीवं आ॰ ॥ २९ ॥ पुष्पदंताय॰पुष्पदंतं आ॰ ॥ २० ॥ वरुणाय॰वरुणं आ॰ ॥ २१ ॥ अ
सुराय॰असुरं आ॰ ॥ २२ ॥ शोकाय॰शोकं आ॰ ॥ २३ ॥ पापाय॰पापं आ॰ ॥ २४ ॥ रोगाय॰रोगं आ॰ ॥ २५ ॥ सर्पाय॰सर्पं आ॰ ॥ २६ ॥
मुख्याय॰मुख्यं आ॰ ॥ २७ ॥ भल्लाटाय॰भल्लाटं आ॰ ॥ २८ ॥ सोमाय॰सोमं आ॰ ॥ २९ ॥ उरगाय॰उरगं आ॰ ॥ ३० ॥ अदितये॰
अदितिं आ॰ ॥ ३० ॥ दितये॰दितिं आ॰ ॥ ३१ ॥ अद्भ्यो॰अपः आ॰ ॥ ३२ ॥ सवित्रे॰सवितारं आ॰ ॥ ३३ ॥ जयंताय॰जयंतं आ॰ ॥ ३४ ॥
रुद्राय॰रुद्रं आ॰ ॥ ३५ ॥ अर्यम्णे॰अर्यमाणं आ॰ ॥ ३६ ॥ सवित्रे॰सवितारं आ॰ ॥ ३७ ॥ विवस्वते॰विवस्वंतं आ॰ ॥ ३८ ॥ विबुधा
धिपाय॰विबुधाधिपं आ॰ ॥ ३९ ॥ मित्राय॰मित्रं आ॰ ॥ ४० ॥ राजयक्ष्मणे॰राजयक्ष्माणं आ॰ ॥ ४१ ॥ पृथ्वीधराय॰पृथ्वीध
रं आ॰ ॥ ४२ ॥ आपवत्साय॰आपवत्सं॰आ॰ ॥ ४४ ॥ ब्रह्मणे॰ब्रह्माणं आ॰मि॰ ॥ ४५ ॥ ईशानादिक्रमेण ॥ चरक्यै नमः चरकीं आ
वा॰ १ ॥ विदार्यै॰विदारीं आ॰ आग्नेये २ ॥ नैरृत्ये पूतनां आ॰ ३ ॥ वायव्ये पापराक्षस्यै॰पापराक्षसीं आ॰ ४ ॥ अथ पूर्वा
दिक्रमेण ॥ पूर्वे स्कंदाय॰स्कंदं आ॰ १ ॥ दक्षिणे ॥ अर्यम्णे॰अर्यमाणं आ॰ २ ॥ पश्चिमे जृंभकं आ॰ ३ ॥ उत्तरे पि
लिपिंछाय॰पिलिपिंछं आ॰ ॥ ४ ॥ पूर्वादिक्रमेण लोकपालचतुष्टयं ॥ पूर्वे जयसेनाय॰जयसेनं आ॰ १ ॥ दक्षिणे
डामराय॰डामरं आ॰ २ ॥ पश्चिमायां महाकालाय॰महाकालं आ॰ ३ ॥ उत्तरे पिलिपिंछाय॰पिलिपिंछं
आवाहयामि स्थापयामि ॥ ४ ॥ मध्ये वास्तुपुरुषस्थापनं सूक्तेन पूर्वोक्तै दशमंत्रैः ॥ अत्र मूर्त्तीनामग्न्युत्तारणं ॥
अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनंजयः ॥ पंचैतानि स्मरेद्देवमग्न्युत्तारणमीरितं ॥ एवं त्रिः ॥ तदनंतरं ॥ प्रतिष्ठाप
येण मूर्त्तेः प्रतिष्ठां कुर्यात् ॥ तदनंतरं ॥ शिख्यादि आवाहित देवतानां सहित वास्तुदेवताभ्यो नमः ॥ आवाहनादि पूजनं

[illegible]